# प्रथमसत्रीया परीक्षा

## आदर्श-प्रश्नपत्रम् (बहुविकल्पात्मकम्) - 2021-22

## कक्षा - दशमी

## संस्कृतम् (कोड-122)

**समयः – सार्धैक-होरा** **सम्पूर्णाङ्काः – 40**

| | **अनुप्रयुक्त-व्याकरणम्** | |
|---|---|---|
| 1. | **अधोलिखितवाक्येषु रेखाङ्कितपदस्य सन्धिपदं सन्धिच्छेदपदं वा चिनुत- (केवलं प्रश्नचतुष्टयम्)**<br>(i) महानगरमध्ये **<u>चलदनिशं</u>** कालायसचक्रम्।<br>(क) चलद् + निशम् (ख) चलत् + अनिशम्<br>(ग) चलद् +अनिशम् (घ) चल + दनिशम्<br>(ii) त्वया महत्कौतुकम् आवेदितं **<u>यत् + मानुषादपि</u>** बिभेषि?<br>(क) यत्मानुषादपि (ख) यद्मानुषादपि<br>(ग) यन्मानुषादपि (घ) यतमानुषादपि<br>(iii) अतिदीर्घः **<u>प्रवासः + अयं</u>** दारुणश्च।<br>(क) प्रवासोऽयम् (ख) प्रवासरयम्<br>(ग) प्रवास अयम् (घ) प्रवासोयम्<br>(iv) अचिरादेव चण्डवातेन **<u>मेघरवैश्च</u>** प्रवर्षः समजायत।<br>(क) मेघः + रवैश्च (ख) मेघरवै + च<br>(ग) मेघ + रवैश्च (घ) मेघरवैः + च<br>(v) **<u>अयमेकः + तावत्</u>** विभज्य भुज्यताम्।<br>(क) अयमेकश्तावत् (ख) अयमेकष्तावत्<br>(ग) अयमेकस्तावत् (घ) अयमेको तावत् | 1×4=4 |
| 2. | **अधोलिखितवाक्येषु रेखाङ्कितपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चिनुत– (केवलं प्रश्नचतुष्टयम्)**<br>(i) कुत्सितवस्तुमिश्रितं भक्ष्यं **<u>समलं</u>** धरातलम्।<br>(क) मलस्य योग्यम् (ख) मलं मलं प्रति<br>(ग) मलेन सहितम् (घ) मलस्य अभावः<br>(ii) **<u>भयेन आकुलं</u>** व्याघ्रं दृष्ट्वा कश्चित् धूर्तः श्रृगालः हसन्नाह।<br>(क) भयेनाकुलम् (ख) भयाकुलम्<br>(ग) भयकुलम् (घ) भयाआकुलम् | 1×4=4 |

| | | |
|---|---|---|
| | (iii) ततः प्रविशतः विदूषकेनोपदिश्यमानमार्गौ तापसौ **<u>कुशलवौ</u>**।<br>(क) कुशः च लवः च (ख) लवः च कुशः च<br>(ग) लवयोः च कुशयोः च (घ) कुशस्य च लवस्य च<br>(iv) कश्चित् कृषक: बलीवर्दाभ्यां **<u>क्षेत्रस्य कर्षणं</u>** कुर्वन्नासीत्।<br>(क) क्षेत्राकर्षणम् (ख) क्षेत्रं कर्षणम्<br>(ग) क्षेत्रस्यकर्षणम् (घ) क्षेत्रकर्षणम्<br>(v) श्रीरामः **<u>सवाष्पम्</u>** अवलोकयति।<br>(क) वाष्पस्य सहितम् (ख) सवः च वाष्पं च<br>(ग) वाष्पेन सहितम् (घ) वाष्पस्य अभावः | |
| 3. | **अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा उचितम् उत्तरं विकल्पेभ्यः चिनुत- (केवलं प्रश्नचतुष्टयम्)**<br>(i) अन्योऽपि **<u>बुद्धिमान्</u>** लोके मुच्यते महतो भयात् ।<br>(क) बुद्धि + तल् (ख) बुद्धि + टाप्<br>(ग) बुद्धि + मतुप् (घ) बुद्धि + त्व<br>(ii) नवमालिका रसालं **<u>मिलिता</u>** रुचिरं संगमनम्।<br>(क) मिलित + टाप् (ख) मिल् + टाप्<br>(ग) मिल् + त्व (घ) मिल् + क्त<br>(iii) बुद्धिः **<u>बल + मतुप्</u>** तन्वि सर्वकार्येषु सर्वदा।<br>(क) बलमती (ख) बलवान्<br>(ग) बलवती (घ) बलवत्यः<br>(iv) आकारस्य **<u>लघु+त्व</u>** कार्यबाधकः न भवेत्।<br>(क) लघुत्ता (ख) लघुत्वम्<br>(ग) लघुत्वा (घ) लघुत्वः<br>(v) वेदानां **<u>महत्त्वं</u>** को न जानाति।<br>(क) महत् + त्त्वा (ख) मह + त्व<br>(ग) महत्त् + त्व (घ) महत् + त्व | 1×4=4 |
| 4. | **वाच्यस्य नियमानुगुणम् उचितं विकल्पं चिनुत। (केवलं प्रश्नत्रयम्)**<br>(i) बालकः ---------------------- खादति।<br>(क) पायसम् (ख) पायसः<br>(ग) पायसेन (घ) पायसस्य | 1×3=3 |

| | | |
|---|---|---|
| | (ii) --------------------- चित्राणि दृश्यन्ते ।<br>(क) अहम् (ख) माम्<br>(ग) मया (घ) मह्यम्<br>(iii) मात्रा रोटिकाः --------------- ।<br>(क) पचति (ख) पच्यन्ते<br>(ग) पच्यते (घ) पचन्ति<br>(iv) -------------------- फलानि आनयति ।<br>(क) पितरः (ख) पितरौ<br>(ग) पित्रा (घ) पिता | |
| 5. | **प्रदत्तेभ्यः विकल्पेभ्यः समुचितं कालबोधकशब्दं चिनुत - (केवलं प्रश्नचतुष्टयम्)**<br>(i) माता प्रात: --------------------- (08:00) उत्तिष्ठति ।<br>(क) सार्ध-अष्टवादने (ख) अष्टवादने<br>(ग) पादोन-अष्टवादने (घ) आष्टवादने<br>(ii) चेतक-एक्सप्रेस इति रेलयानं --------------------- (4:45) देहलीम् आगच्छति।<br>(क) सार्ध-चतुर्वादने (ख) पादोन-चतुर्वादने<br>(ग) पादोन–पञ्चवादने (घ) सपाद – चतुर्वादने<br>(iii) मल्लिका --------------------- (7:30) प्रातराशं करोति।<br>(क) सार्ध-सप्तवादने (ख) सपाद-सप्तवादने<br>(ग) पादोन-सप्तवादने (घ) सप्तवादने<br>(iv) राहुल: प्रातर्भ्रमणाय --------------------- (6:15) उद्यानं गच्छति।<br>(क) षड्वादने (ख) सार्ध-षड्वादने<br>(ग) पादोन-षड्वादने (घ) सपाद-षड्वादने<br>(v) रेलयानमेकं ------------------------- (1:15) उत्तराञ्चलं प्रति गच्छति।<br>(क) सार्ध-एकवादने (ख) सपाद-एकवादने<br>(ग) पादोन-एकवादने (घ) एकवादने | 1×4=4 |
| 6. | **वाक्यानुगुणम् उचिताव्ययपदं चिनुत - (केवलं प्रश्नत्रयम्)**<br>(i) दुर्वहम् ---------------------- जीवितं जातं प्रकृतिरेव शरणम्।<br>(क) तर्हि (ख) शनैः<br>(ग) सहसा (घ) अत्र<br>(ii) यत्रास्ते सा धूर्ता -------------------- गम्यताम्।<br>(क) तत्र (ख) अत्र<br>(ग) अन्यत्र (घ) अपि | 1×3=3 |

| | | |
|---|---|---|
| | (iii) सः दीनः इति जानन् ----------------- कृषकः तं बहुधा पीडयति।<br>(क) श्वः (ख) कुतः<br>(ग) अपि (घ) ह्यः<br>(iv) रामम् उपसृत्य प्रणम्य ----------------------- कुशलवौ वदतः।<br>(क) वृथा (ख) च<br>(ग) ह्यः (घ) इतस्तत | |
| 7. | अधोलिखितवाक्येषु रेखाङ्कितपदम् अशुद्धम् अस्ति। शुद्धं पदं विकल्पेभ्यः चिनुत- (केवलं प्रश्नत्रयम्)<br>(i) त्वं पाठं **<u>पठति</u>**।<br>(क) पठथ (ख) पठसि<br>(ग) पठन्ति (घ) पठथः<br>(ii) **<u>फलाः</u>** करण्डके सन्ति।<br>(क) फलम् (ख) फलः<br>(ग) फलानि (घ) फले<br>(iii) तौ बालकौ **<u>गच्छति</u>**।<br>(क) गच्छसि (ख) गच्छन्ति<br>(ग) गच्छति (घ) गच्छतः<br>(iv) राधा श्वः **<u>गच्छति।</u>**<br>(क) गमिष्यति (ख) अगच्छत्<br>(ग) गच्छतु (घ) गच्छसि | 1×3=3 |
| | **पठितावबोधनम्** | |
| 8. | रेखाङ्कित-पदानि आधृत्य समुचितं प्रश्नवाचकपदं चिनुत- (केवलं प्रश्नपञ्चकम्)<br>(i) अत्र जीवितं **<u>दुर्वहं</u>** जातम्।<br>(क) किम् (ख) कीदृशः<br>(ग) कीदृशम् (घ) कम्<br>(ii) सः ऋषभः हलमूढ्वा गन्तुमशक्तः **<u>क्षेत्रे</u>** पपात।<br>(क) कस्मै (ख) के<br>(ग) कदा (घ) कुत्र<br>(iii) त्वं **<u>मानुषात्</u>** बिभेषि।<br>(क) कस्मात् (ख) कुतः<br>(ग) कस्याः (घ) कति | 1×5=5 |

| | | |
|---|---|---|
| | (iv) <u>**आर्यस्य**</u> वन्दनायां लव इत्यात्मानं श्रावयामि।<br>(क) कस्मिन् (ख) कस्य<br>(ग) कस्याः (घ) कस्मै<br>(v) अयम् <u>**अन्येभ्यो**</u> दुर्बलः।<br>(क) के (ख) काभ्यः<br>(ग) कस्मात् (घ) केभ्यः<br>(vi) <u>**तपोवने**</u> तस्य नाम व्यवहरति।<br>(क) कुत्र (ख) के<br>(ग) कस्याम् (घ) कुतः | |
| 9. | **अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुकुलम् उचितार्थं चिनुत- (केवलं प्रश्नचतुष्टयम्)**<br>(i) भयङ्करा व्याघ्रमारी <u>**तूर्णं**</u> धाविता ।<br>(क) मन्दम् (ख) शीघ्रम्<br>(ग) वृथा (घ) पुरतः<br>(ii) व्याघ्रमारी काचिदियमिति मत्वा व्याघ्रो भयाकुलचित्तो <u>**नष्टः**</u>।<br>(क) खादितः (ख) दत्तः<br>(ग) कृतः (घ) पलायितः<br>(iii) सुरभिवचनं श्रुत्वा <u>**भृशं**</u> विस्मितस्याखण्डलस्यापि हृदयमद्रवत्।<br>(क) अतिन्यूनम् (ख) वृषभम्<br>(ग) बहु अधिकम् (घ) अनेकवारम्<br>(iv) किं कुपिता एवं <u>**भणति**</u>, उत प्रकृतिस्था?<br>(क) कथयति (ख) ताडयति<br>(ग) गर्जति (घ) हसति<br>(v) एकान्ते <u>**कान्तारे**</u> क्षणमपि मे स्यात् सञ्चरणम् ।<br>(क) ग्रामे (ख) नगरे<br>(ग) वने (घ) कृषकस्य गृहे | 1×4=4 |
| 10. | **भाषिककार्यसम्बद्धानां प्रश्नानां समुचितम् उत्तरं विकल्पेभ्यः चिनुत – (केवलं प्रश्नषट्कम्)**<br>(i) "क्रुद्धः कृषीवलः तमुत्थापयितुं बहुवारम् यत्नमकरोत्" अस्मिन् वाक्ये विशेष्यपदं किम्?<br>(क) क्रुद्धः (ख) कृषीवलः<br>(ग) बहुवारम् (घ) तम्<br>(ii) "यदि एवं तर्हि मां निजगले बद्ध्वा चल सत्वरम्।' अत्र 'शीघ्रम्' पदस्य पर्यायपदं किम्?<br>(क) यदि (ख) बद्ध्वा<br>(ग) सत्वरम् (घ) तर्हि | 1×6=6 |

| | | | |
|---|---|---|---|
| | (iii) "जानाम्यहं तस्य नामधेयम्।" अत्र क्रियापदं किम्?<br>(क) जानामि (ख) अहम्<br>(ग) जानाम्यम् (घ) तस्य<br>(iv) "सः कृच्छ्रेण भारमुद्वहति।" अत्र 'सरलतया' इत्यस्य किं विलोमपदं प्रयुक्तम्?<br>(क) सः (ख) कृच्छ्रेण<br>(ग) उद्वहति (घ) भारम्<br>(v) "यानानां पङ्क्तयो ह्यनन्ताः।" अस्मिन् वाक्ये किं विशेषणपदं प्रयुक्तम्?<br>(क) यानानाम् (ख) पङ्क्तयः<br>(ग) अनन्ताः (घ) हि<br>(vi) ''सः व्याघ्रः तथा कृत्वा काननं ययौ।" अत्र कर्तृपदं किम्?<br>(क) सः (ख) व्याघ्रः<br>(ग) काननम् (घ) ययौ<br>(vii) "अतिदीर्घः प्रवासोऽयं दारुणश्च।" अत्र विशेष्यपदं किम्?<br>(क) अतिदीर्घः (ख) अयम्<br>(ग) दारुणः (घ) प्रवासः<br>(viii) "दुर्दान्तैर्दशनैरमुना स्यान्नैव जनग्रसनम्" अत्र 'दन्तैः' इत्यर्थे किं पदं दत्तम्?<br>(क) दुर्दान्तैर्दशनैः (ख) दर्दान्तैः<br>(ग) दशनैः (घ) जनग्रसनम् | |

*********************************************

# अङ्कयोजना उत्तरसङ्केताश्च

## कक्षा – दशमी

## प्रथमसत्रीया परीक्षा - 2021-22

## संस्कृतम्  (कोड संख्या -122)

**समयः – सार्धैक-होरा** **सम्पूर्णाङ्काः – 40**

| | | |
|---|---|---|
| **अवधातव्यम् -**<br>**प्रश्नपत्रे यत्र आन्तरिकविकल्पः अस्ति तत्र स्पष्टतया निर्देशः दत्तः अस्ति यत् केवलं प्रश्नद्वयम् अथवा प्रश्नत्रयम् इत्यादिकं तथापि यदि छात्रः सर्वेषां प्रश्नानाम् उत्तराणि लिखति तर्हि छात्रहिताय यत्र अधिकाः अङ्काः दातुं शक्यन्ते तादृशानां प्रश्नानां मूल्याङ्कनं करणीयम्।** | | |
| **प्रश्नसङ्ख्या** | **बहुविकल्पात्मकाः प्रश्नाः** | **40 अङ्काः** |
| | **अनुप्रयुक्तव्याकरणम्** | |
| 1. | **सन्धिः /सन्धिच्छेदः** **(केवलं प्रश्नचतुष्टयम्)**<br>(i) (ख) चलत् + अनिशम्<br>(ii) (ग) यन्मानुषादपि<br>(iii) (क) प्रवासोऽयम्<br>(iv) (घ) मेघरवैः + च<br>(v) (ग) अयमेकस्तावत् | 1×4=4 |
| | | |
| 2. | **समासः / विग्रहः** **(केवलं प्रश्नचतुष्टयम्)**<br>(i) (ग) मलेन सहितम्<br>(ii) (ख) भयाकुलम्<br>(iii) (क) कुशः च लवः च<br>(iv) (घ) क्षेत्रकर्षणम्<br>(v) (ग) वाष्पेन सहितम् | 1×4=4 |
| | | |

| | | |
|---|---|---|
| 3. | **प्रकृति-प्रत्ययौ** (केवलं प्रश्नचतुष्टयम्)<br>(i) (ग) बुद्धि + मतुप्<br>(ii) (क) मिलित + टाप्<br>(iii) (ग) बलवती<br>(iv) (ख) लघुत्वम्<br>(v) (घ) महत् + त्व | 1×4=4 |
| | | |
| 4. | **वाच्यम्** (केवलं प्रश्नत्रयम्)<br>(i) (क) पायसम्<br>(ii) (ग) मया<br>(iii) (ख) पच्यन्ते<br>(iv) (घ) पिता | 1×3=3 |
| | | |
| 5. | **समयः** (केवलं प्रश्नचतुष्टयम्)<br>(i) (ख) अष्टवादने<br>(ii) (ग) पादोन–पञ्चवादने<br>(iii) (क) सार्ध-सप्तवादने<br>(iv) (घ) सपाद-षड्वादने<br>(v) (ख) सपाद-एकवादने | 1×4=4 |
| | | |
| 6. | **अव्ययपदानि** (केवलं प्रश्नत्रयम्)<br>(i) (घ) अत्र<br>(ii) (क) तत्र<br>(iii) (ग) अपि<br>(iv) (ख) च | 1×3=3 |
| | | |
| 7. | **अशुद्धि-संशोधनम्** (केवलं प्रश्नत्रयम्)<br>(i) (ख) पठसि<br>(ii) (ग) फलानि<br>(iii) (घ) गच्छतः<br>(iv) (क) गमिष्यति | 1×3=3 |

| | पठितावबोधनम् | |
|---|---|---|
| 8. | प्रश्ननिर्माणः (केवलं प्रश्नपञ्चकम्)<br>(i) (ग) कीदृशम्<br>(ii) (घ) कुत्र<br>(iii) (क) कस्मात्<br>(iv) (ख) कस्य<br>(v) (घ) केभ्यः<br>(vi) (क) कुत्र | 1×5=5 |
| | | |
| 9. | उचितार्थ-चयनम् (केवलं प्रश्नचतुष्टयम्)<br>(i) (ख) शीघ्रम्<br>(ii) (घ) पलायितः<br>(iii) (ग) बहु अधिकम्<br>(iv) (क) कथयति<br>(v) (ग) वने | 1×4=4 |
| | | |
| 10. | भाषिककार्यम् (केवलं प्रश्नषट्कम्)<br>(i) (ख) कृषीवलः<br>(ii) (ग) सत्वरम्<br>(iii) (क) जानामि<br>(iv) (ख) कृच्छ्रेण<br>(v) (ग) अनन्ताः<br>(vi) (ख) व्याघ्रः<br>(vii) (घ) प्रवासः<br>(viii) (ग) दशनैः | 1×6=6 |
| | | |

-------------0000--------------